# kAlabhairavAShTakaM

# શ્રીકાલભૈરવાષ્ટકમ્

## Document Information

Text title : kaalabhairavaaShTakaM 1-0

File name : kaalabhairava.itx

Category : aShTaka, shiva, shankarAchArya

Location : doc_shiva

Author : Shankaracharya

Transliterated by : Narayanaswami Pallasena at swami at math.mun.ca

Proofread by : Narayanaswami Pallasena, Sunder Hattangadi

Latest update : August 10, 2002, June 20, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 15, 2025

*sanskritdocuments.org*

kAlabhairavAShTakaM

# શ્રીકાલભૈરવાષ્ટકમ્

દેવરાજસેવ્યમાનપાવનાંઘ્રિપઙ્કજં
વ્યાલયજ્ઞસૂત્રમિન્દુશેખરં કૃપાકરમ્ ।
નારદાદિયોગિવૃન્દવન્દિતં દિગંબરં
કાશિકાપુરાધિનાથકાલભૈરવં ભજે ॥ ૧॥

ભાનુકોટિભાસ્વરં ભવાબ્ધિતારકં પરં
નીલકણ્ઠમીપ્સિતાર્થદાયકં ત્રિલોચનમ્ ।
કાલકાલમંબુજાક્ષમક્ષશૂલમક્ષરં
કાશિકાપુરાધિનાથકાલભૈરવં ભજે ॥ ૨॥

શૂલટંકપાશદણ્ડપાણિમાદિકારણં
શ્યામકાયમાદિદેવમક્ષરં નિરામયમ્ ।
ભીમવિક્રમં પ્રભું વિચિત્રતાણ્ડવપ્રિયં
કાશિકાપુરાધિનાથકાલભૈરવં ભજે ॥ ૩॥

ભુક્તિમુક્તિદાયકં પ્રશસ્તચારુવિગ્રહં
ભક્તવત્સલં સ્થિતં સમસ્તલોકવિગ્રહમ્ । (સ્થિરમ્)
વિનિક્વણન્મનોજ્ઞહેમકિઙ્કિણીલસત્કટિં (નિક્વણન્)
કાશિકાપુરાધિનાથકાલભૈરવં ભજે ॥ ૪॥

ધર્મસેતુપાલકં ત્વધર્મમાર્ગનાશકં (નાશનં)
કર્મપાશમોચકં સુશર્મદાયકં વિભુમ્ ।
સ્વર્ણવર્ણશેષપાશશોભિતાંગમણ્ડલં (કેશપાશ, નિર્મલં)
કાશિકાપુરાધિનાથકાલભૈરવં ભજે ॥ ૫॥

રત્નપાદુકાપ્રભાભિરામપાદયુગ્મકં
નિત્યમદ્વિતીયમિષ્ટદૈવતં નિરંજનમ્ ।
મૃત્યુદર્પનાશનં કરાલદંષ્ટ્રમોક્ષદં (ભૂષણં)
કાશિકાપુરાધિનાથકાલભૈરવં ભજે ॥ ૬॥

અટ્ટહાસભિન્નપદ્મજાણ્ડકોશસંતતિં
દૃષ્ટિપાતનષ્ટપાપજાલમુગ્રશાસનમ્ ।
અષ્ટસિદ્ધિદાયકં કપાલમાલિકાધરં
કાશિકાપુરાધિનાથકાલભૈરવં ભજે ॥ ૭॥

ભૂતસંઘનાયકં વિશાલકીર્તિદાયકં
કાશિવાસલોકપુણ્યપાપશોધકં વિભુમ્ । (કાશિવાસિ)
નીતિમાર્ગકોવિદં પુરાતનં જગત્પતિં
કાશિકાપુરાધિનાથકાલભૈરવં ભજે ॥ ૮॥

॥ ફલશ્રુતિઃ ॥

કાલભૈરવાષ્ટકં પઠંતિ યે મનોહરં
જ્ઞાનમુક્તિસાધનં વિચિત્રપુણ્યવર્ધનમ્ ।
શોકમોહદૈન્યલોભકોપતાપનાશનં (લોભદૈન્ય)
પ્રયાન્તિ કાલભૈરવાંઘ્રિસન્નિધિં નરા ધ્રુવમ્ ॥

(તે પ્રયાન્તિ કાલભૈરવાંઘ્રિસન્નિધિં ધ્રુવમ્ ॥)

॥ ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ
શ્રી કાલભૈરવાષ્ટકં સમ્પૂર્ણમ્ ॥

This is found in Complete Works of
Shankaracharya, Volume 18, page 89.

There is a similar one in Shivarahasya
aMshaH 11 adhyAyaH 34 . 53-61..

Encoded by Narayanaswami Pallasena at swami@math.mun.ca
Proofread by Narayanaswami Pallasena and Sunder Hattangadi

*kAlabhairavAShTakaM*

pdf was typeset on February 15, 2025

Please send corrections to *sanskrit@cheerful.com*